कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M703 विषय काव्य.
नाव. रघुवंशम (द्वितीयसर्ग:) Mss..
लेखक/लिपीकार –.
पृष्ठ 7 काळ – पूर्ण/अपूर्ण

रघुवंशम् द्वितीयसर्गः

७

॥ श्रीगणेशायनमः अथप्रजानामधिपः प्रभाते जायाप्रतिग्राहितगं

धमाल्यां ॥ वनायपीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥ १॥

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरिकीर्तनीया ॥ मार्गंमनु

ष्येश्वरधर्मपत्नी श्रुतेरिवार्थंस्मृतिरन्वगच्छत् ॥ २॥ निवर्त्यराजादयि

तां दयालुस्तांसौरभेयीं सुरभिर्यशोभिः ॥ पयोधरीभूतचतुःसमुद्रां

जुगोपगोरूपधरामिवोर्वीम् ॥३॥ व्रतायतेनानुचरेणधेनोर्न्यषेधिशेषो

प्यनुयायिवर्गः ॥ नचान्यतस्तस्यशरीररक्षास्ववीर्यगुप्ताहिमनोःप्रसूतिः ॥४॥

आस्वादवद्भिःकवलैस्तृणानांकंडूयनैर्दंशनिवारणैश्च ॥ अव्याहतैःस्वैरगतैःस

तस्याःसम्राट्समाराधनतत्परोऽभूत् ॥५॥ स्थितःस्थितामुच्चलितःप्रयातांनिषेदु

षीमासनबंधधीरः ॥ जलाभिलाषीजलमाददानांछायेवतांभूपतिरन्वगच्छत् ॥६॥

२

सन्यस्तचिन्हामपिराज्यलक्ष्मींतेजोविशेषानुमितांदधानः आसीदनाविष्कृत

दानराजिरंतर्मदावस्थइवद्विपेंद्रः ॥७॥ लताप्रतानोद्ग्रथितैःसकेशैर

धिज्यधन्वाविचचारदावं रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्नि

वदुष्टसत्वान् ॥८॥ विसृष्टपार्श्वानुचरस्यतस्यपार्श्वद्रुमाःपाशभृ

तासमस्य ॥ उदीरयामासुरिवोन्मदानामालोकशब्दंवयसांविरावैः ॥९॥

मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्त्तमानं ॥ अवाकिरन्बा
ललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥ १० ॥ धनुर्भृतोप्यस्य दया
र्द्रभावमाख्यातमंतःकरणैर्विशंकैः विलोकयंत्यो वपुरापुरक्ष्णां प्रकामवि
स्तारफलं हरिण्यः ॥ ११ ॥ स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंश
कृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥ १२ ॥ ७ ॥

२

पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी तमातपक्लांत
मनातपत्रमाचारपूतं पवनः सिषेवे १३ शशाम वृष्ट्यापि विना दवाग्नि
रासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गो
प्तरि गाहमाने १४ संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय
गंतुं प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः १५ तां देव

तापित्रतिथिक्रियार्थामन्वग्ययौमध्यमलोकपालः ॥ बभौचसातेन

सतांमतेनश्रद्धेवसाक्षाद्विधिनोपपन्ना ॥ १६ सपल्वलोत्तीर्णव

राहयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौमृगाध्यासितशाद्व

लानिश्यामायमानानिवनानिपश्यन् ॥ १७॥ आपीनभारोद्वहन

प्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषोनरेंद्रः ॥ उभावलंचक्रतुरंचिताभ्यांतपो

वनावृत्तिपथंगताभ्यां ॥ १८॥ वसिष्ठधेनोरनुयायिनंतमावर्त्तमानंवनिता

वनांतात् पपौनिमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिवलोचनाभ्यां ॥ १९॥

पुरस्कृतावर्त्मनिपार्थिवेनप्रत्युद्गतापार्थिवधर्मपत्न्या ॥ तदंतरेसाविरराज

धेनुर्दिनक्षपामध्यगतेवसंध्या ॥ २०॥ प्रदक्षिणीकृत्यपयस्विनीं

तांस्कदक्षिणासाक्षतपात्रहस्ता प्रणम्यचानर्चविशालमस्याःशृंगांतरं